ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं ॥

# कल्याणपञ्चाशत् कदम्बकम्

Version 0.0 Sep 30, 2024

# Version Notes:

**This is now the current Version 0.0 dated Sep 30, 2024.**

Kindly send your feedback for any corrections/modifications to our e-mail id **vedavms@gmail.com**

## Notes:

We happened to receive a book “Kalyana Panchashat Kadambakam”, in grantha lipi “ publised during the year 1926 from a Senior Veda Student. We have made an attempt to compile this in Sanskrit, Tamil and Malayalam for the benefit of the learners who donot have the access to this grantha text.

We hereby acknowledge the interest / efforts taken by the original publishers and thank them for making that book available for future generations.

We donot want to take any credit, whatsoever, for our work and we are merely passing on the original work to next generation of veda learners for their benefit. We have not made any changes and kept the order as it is in the orignal book.

**Shree Gurubyo namaha**

## Table of Contents

1 आशीर्वाद वाक्यानि ........................................................ 4

2 क्रम कदम्बम्........................................................ 22

3 जटा कदम्बम्........................................................ 42

4 घन कदम्बम् ........................................................ 57

===========

# 1 आशीर्वाद वाक्यानि

1. अस्मे देवासो वपुषे चिकित्सत यमाशिरा दम्पती वाममश्ञुतः ।
पुमान् पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः ॥
आशीर्दाया दम्पती वाम–मश्ञुता–मरिष्टो रायः सचता॑ं
समोकसा ।
य आ ऽसिचथ् सन्दुग्धं कुम्भ्या सहेष्टेन यामन्नमतिं जहातु सः ॥
सर्पिर्ग्रीवी पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य ।
सहजानिर् यः सुमखस्यमान इन्द्रायाऽऽशिर॑ं सह कुम्भ्या ऽदात् ॥
आशीर् म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविण॑ं सवर्चसं ।
सञ्जयन् क्षेत्राणि सहसा ऽहमिन्द्र कृण्वानो अन्या॑ं
अधरान्थ् सपत्नान् ॥ **1 (TS 3.2.8.4 & TS 3.2.8.5)**

2. आशिषमेवैतामाशास्ते पूर्णपात्रे । अन्ततोऽनुष्टुभा ।
चतुष्पद्वा एतच्छन्दः प्रतिष्ठितं पत्नियै पूर्णपात्रे भवति ।
अस्मिन् ँल्लोके प्रतितिष्ठानीति । अस्मिन्नेव लोके प्रतितिष्ठति ।
अथो वाग्वा अनुष्टुक् । वाङ्मिथुनं । आपो रेतः प्रजननं ।
एतस्माद्वै मिथुनाद् विद्योतमानः स्तनयन् वर्.षति । रेतः सिञ्चन्न् ।

प्रजाः प्रजनयन्न् ॥ यद्वै यज्ञस्य ब्रह्मणा युज्यते ।
ब्रह्मणा वै तस्य विमोकः । अद्भिः शान्तिः ।
विमुक्तं ँवा एतर्.हि योक्त्रं ब्रह्मणा ।
आदायैनत् पत्नी सहाप उपगृह्णीते शान्त्यै ।
अञ्जलौ पूर्णपात्र–मानयति । रेत एवास्यां प्रजां दधाति ।
प्रजया हि मनुष्यः पूर्णः । मुखं ँविमृष्टे ।
अवभृथस्यैव रूपं कृत्वोत्तिष्ठति ॥ **2**

(**TB 3.3.10.3** & **TB 3.3.10.4**)

**3.** गोमृगकण्ठेन प्रथमामाहुतिं जुहोति ।
पशवो वै गोमृगः । रुद्रोऽग्निः स्विष्टकृत् ।
रुद्रादेव पशूनन्तर्दधाति । अथो यत्रैषाऽऽहुतिर्. हूयते ।
न तत्र रुद्रः पशूनभिमन्यते ॥ अश्वशफेन द्वितीयामाहुतिं जुहोति ।
पशवो वा एकशफं । रुद्रोऽग्निः स्विष्टकृत् । रुद्रादेव पशूनन्तर्दधाति ।
अथो यत्रैषाऽऽहुतिर्. हूयते । न तत्र रुद्रः पशूनभिमन्यते ॥
अयस्मयेन कमण्डलुना तृतीयां । आहुतिं जुहोत्यायास्यो वै प्रजाः ।
रुद्रोऽग्निः स्विष्टकृत् । रुद्रादेव प्रजा अन्तर्दधाति ।

अथो यत्रैषाऽऽहुतिर्. हूयते । न तत्र रुद्रः प्रजा अभिमन्यते ॥ **3**
(**TB 3.9.11.3 & TB 3.9.11.4**)

**4.** अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतं ।
इह प्रजामिह रयिꣳ रराणः प्रजायस्व प्रजया पुत्रकाम ॥
अपश्यं त्वा मनसा दीद्ध्यानाꣳ स्वायां तनूꣳ
ऋत्विये नाथमानां । उप मामुच्चा युवतिर् बुभूयाः प्रजायस्व
प्रजया पुत्रकामे ॥ **4** (**EAK 1.11.1**)

**5.** सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्र एते चैवाऽऽसने
श्वेतश्चाश्वतरीरथो होतुः ।
पुत्रकामा हाप्याख्यापयेरन् लभन्ते ह पुत्रान् लभन्ते ह पुत्रान् ॥
**(aitareya Bharamanam)**

**6.** सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ॥

**TS 5.4.12.3**

**7.** ऋध्यास्म हव्यैर् नमसोप सद्य । मित्रं देवं मित्रधेयन्नो अस्तु ।
अनुराधान्. हविषा वर्द्धयन्तः । शतं जीवेम शरद–स्सवीराः ॥

**TB 3.1.2.1**

8. नवोनवो भवति जायमानोऽह्नाङ्केतु–रुषसामेत्यग्रे ।
भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तरति दीर्घमायुः ॥ **TS 2.4.14.1**

9. सुमङ्गलीरियं वधूरिमाꣳ समेत पश्यत ।
सौभाग्य मस्यै दत्वायाथास्तं वि परेतन ॥ **RV- 10.85.33**
इमां त्वमिन्द्र मीड्व स्सुपुत्राꣳ सुभगां कुरु ।
दशास्यां पुत्रानाधेहि पति–मेकादशं कृधि ॥
**RV 10.85.45**

10. शतमानं भवति शतायुः पुरुष–श्शतेन्द्रिय
आयुष्येवेन्द्रिये प्रतितिष्ठति ॥ **TB 1.3.7.8**

11. तेजस्वी यशस्वी ब्रह्मवर्चसी स्या–मिति ।
प्राङ्गहोतुर्द्धिष्ण्या–दुथ्सर्पेत् ।
येयं प्रागाद् यशस्वती । सा मा प्रोर्णोतु ।
तेजसा यशसा ब्रह्मवर्चसे–नेति ।
तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति ॥ **TB 3.11.9.8**

12. पशुभ्योऽधीन्द्रं । तदिन्द्रं ँयश आर्च्छत् ।
तदेनं नाति प्राच्यवत । इन्द्र इव यशस्वी भवति । **TB 2.3.2.5**

13. अग्ने कामाय येमिर इति । कामानेवास्मिन् दधाति ।
कामप्रीता एनं कामा अनुप्रयान्ति । तेजस्वी वीर्यावान् भवति ॥

**TB 3.7.1.2**

14. सिꣳहस्य लोम त्विषि–रिन्द्रियाणि ।
अङ्गान्यात्मन्–भिषजा तदश्विना ।
आत्मानमङ्गैः समधात् सरस्वती ।
इन्द्रस्य रूपꣳ शतमानमायुः । **TB 2.6.4.6.**

15. विमिमे त्वा पयस्वतीं ।
देवानां धेनुꣳ सुदुघा–मनपस्फुरन्तीं ।
इन्द्रः सोमं पिबतु । क्षेमो अस्तु नः ॥ **TB 3.7.7.13**

16. सौर्य एककपालो भवति । सूर्येण वा अमुष्मिन् ँलोके वृष्टिर् धृता ।
स एवास्मै वृष्टिं नि यच्छति । द्वादशगवꣳ सीरं दक्षिणा समृद्ध्यै ।

**TB 1.7.1.1 & 1.2**

**16 A)** यद्धेनुः । तेनैन्द्री । यथ्स्त्री सती दान्ता ।

तेन वारुणी समृद्ध्यै । **TB 1.7.1.4**

**17.** राते राका । प्र सिनीवाली जनयति ।

प्रजास्वेव प्रजातासु कुह्वा वाचं दधाति ।

मिथुनौ गावौ दक्षिणा समृद्ध्यै । **TB 1.7.2.1**

**18.** सोम एवास्मै रेतो दधाति ।

अग्निः प्रजां प्रजनयति । वृद्धामिन्द्रः प्रयच्छति ।

बभ्रुर्–दक्षिणा समृद्ध्यै । **TB 1.7.2.4**

**19.** पौष्णश्चरुर्–भवति । इयं ँवै पूषा ।

अस्यामेव प्रति तिष्ठति ।

श्यामो दक्षिणा समृद्ध्यै । **TB 1.7.2.5**

**20.** वारुणं ँयवमयं चरुं निर्वपति ।

वरुणपाशादेवैनं मुञ्चति । अश्वो दक्षिणा ।

वारुणो हि देवतयाऽश्वः समृद्ध्यै ॥ **TB 1.7.2.6**

21. बार्.हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे ।
मुखत एवास्मै ब्रह्म सश्यति ।
अथो ब्रह्मन्नेव क्षत्र-मन्वारंभयति ।
शितिपृष्ठो दक्षिणा समृद्ध्यै । **TB 1.7.3.2**

22. आदित्यं चरुं महिष्यै गृहे । इयं ँवा अदितिः ।
अस्यामेव प्रतितिष्ठति । धेनुर् दक्षिणा समृद्ध्यै । **TB 1.7.3.3**

23. मारुतꣳ सप्तकपालं ग्रामण्यो गृहे ।
अन्नं ँवै मरुतः । अन्नमेवावरुन्धे ।
पृश्ञर् दक्षिणा समृद्ध्यै । **TB 1.7.3.5**

24. आश्विनं द्विकपालꣳ सङ्ग्रहीतुर् गृहे ।
अश्विनौ वै देवानां भिषजौ । ताभ्यामेवास्मै भेषजं करोति ।
सवात्यौ दक्षिणा समृद्ध्यै । **TB 1.7.3.5**

25. पौष्णं चरुं भागदुघस्य गृहे । अन्नं ँवै पूषा ।
अन्नमेवावरुन्धे । श्यामो दक्षिणा समृद्ध्यै । **TB 1.7.3.6**

26. एषा प्रतिष्ठा । स्वामेवैनानि योनिं । स्वां प्रतिष्ठां गमयति ।
प्रतितिष्ठति प्रजया पशुभिर् यजमानः ॥ **TB 3.3.2.5**

27. प्रजा ह्यात्मन उत्तरतरा तीर्थे । ततो मेधमुपनीय ।
यथादेवत-मेवैनत्-प्रतिष्ठापयति ।
प्रतितिष्ठति प्रजया पशुभिर् यजमानः ॥ **TB 3.2.10.3**

28. स्त्री पत्नी । तन् मिथुनं ।
मिथुनमेवास्य तद्-यज्ञे करोति प्रजननाय ।
प्रजायते प्रजया पशुभिर् यजमानः । **TB 3.3.3.4**

29. देवा गातुविदो गातुं ँवित्वा गातुमितेत्याह ।
यत एव यज्ञं प्रयुङ्क्ते । तदेनं प्रतिष्ठापयति ।
प्रतितिष्ठति प्रजया पशुभिर् यजमानः ॥ **TB 3.3.9.12**

30. प्राची-मुदीची-माहरति । उभयोर् लोकयो-रभिजित्यै ॥
इषे त्वोर्जे त्वेत्याह । इषमेवोर्जं ँयजमाने दधाति ॥
**TB 3.2.1.3**

31. प्रजाना–मपरावापाय ।
तस्माथ्–स्नावसन्तताः प्रजा जायन्ते ॥
पूषा ते ग्रन्थिं ग्रथ्नात्वित्याह ।
पुष्टिमेव यजमाने दधाति ॥ **TB 3.2.2.8**

32. पश्चाद् वै प्राचीनꣳ रेतो धीयते ।
पश्चादेवास्मै प्राचीनꣳ रेतो दधाति ॥
इन्द्रस्य त्वा बाहुभ्या–मुद्यच्छ इत्याह ।
इन्द्रियमेव यजमाने दधाति ॥ **TB 3.2.2.8**

33. प्राणेष्वेवायुर् दधाति सर्वत्वाय ॥
त्रिवृत् पलाशशाखायां दर्भमयं भवति । त्रिवृद्वै प्राणः ।
त्रिवृतमेव प्राणं मद्ध्यतो यजमाने दधाति । **TB 3.2.3.3**

34. आयुषैवास्मिन्नायुर् दधाति ॥
शतꣳ शतं भवन्ति । शतायुः पुरुषः शतेन्द्रियः ।
आयुष्येवेन्द्रिये प्रतितिष्ठति ॥ **TB 3.8.5.4**

35. अपां चैवौषधीनां च रस९ँ स९ँसृजति ।
तस्मादपां चौषधीनां च रसमुप जीवामः ।
मन्द्रा धनस्य सातय इत्याह ।
पुष्टिमेव यजमाने दधाति ॥ **TB 3.8.5.4**

36. त्रिर् ह्वयति । त्रिषत्या हि देवाः ॥
इष–मावदोर्ज–मावदेत्याह ।
इषमेवोर्जं ँयजमाने दधाति । **TB 3.2.5.8 & TB 3.2.5.9**

37. यत्तावदेव स्यात् । यावज्जुहोति ॥
प्राणाय त्वाऽपानाय त्वेत्याह ।
प्राणानेव यजमाने दधाति । **TB 3.2.6.4**

38. जगत्या तत् । छन्दःसंमितानि स उपदधत् कपालानि ।
इमान् ँलोका–ननुपूर्वं दिशो विधृत्यै दृ९ँहति ।
अथायुः प्राणान् प्रजां पशून्. यजमाने दधाति । **TB 3.2.7.6**

39. यत् पुरोडाशः । तस्मादेवमाह । घर्मोऽसि विश्वायुरित्याह ।
विश्वमेवायुर् यजमाने दधाति । **TB 3.2.8.3 & 3.2.8.4**

**40.** यजमानो वै पुरोडाशः ।
प्रजा पशवः पुरीषं । यद्देवमभि वासयति ।
यजमानमेव प्रजया पशुभिः समर्द्धयति ॥ **TB 3.2.8.9**

**41.** तद्वा अतः पवित्राभ्या-मेवोत्पुनाति ।
यजमानो वा आज्यं । प्राणापानौ पवित्रे ।
यजमान एव प्राणापानौ दधाति । **TB 3.3.4.4**

**42.** यजमान एव तथ् स्वयं परिधीन् परि दधाति ॥
गन्धर्वोऽसि विश्वावसु-रित्याह ।
विश्वमेवायुर् यजमाने दधाति । **TB 3.3.6.8**

**43.** अश्वं ब्रह्मणे । इन्द्रिय-मेवावरुन्धे ।
धेनुं होत्रे । आशिष एवावरुन्धे ।
अनड्वाह-मद्ध्वर्यवे । **TB 1.1.6.10**

**44.** पशुभि-रेवैनं संप्रियं करोति । पशूना-महिंसायै ॥
छर्दि स्तोकाय तनयाय यच्छेत्याह ।
आशिष-मेवैता-माशास्ते ॥ **TB 1.1.8.4**

**45.** विभक्ति–रेवैनयो स्सा ।
अथो नाना वीर्या–वेवैनौ कुरुते ॥
ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याह ।
आशिष–मेवैता–माशास्ते ॥ **TB 1.1.8.5**

**46.** रन्तिर्नामासि दिव्यो गन्धर्व इत्याह ।
रूपमेवास्यै–तन्–महिमान৺ रन्तिं बन्धुतां ँव्याचष्टे ।
समहमायुषा सं प्राणेनेत्याह ।
आशिषमेवैतामाशास्ते । **TA.8.9.8**

**47.** सह प्रजया सह रायस्पोषेणेत्याह ।
प्रजामेव पशून्थ् सोमपीथमात्मन् धत्ते ।
सुमित्रा न आप ओषधयः सन्त्वित्याह ।
आशिषमेवैतामाशास्ते । **TA 8.9.11**

**48.** प्रजा वै बर्.हिः । प्रजानां प्रजननाय ॥
सहस्रवल्.शा वि वय৺ रुहेमेत्याह ।
आशिषमेवैतामाशास्ते ॥ **TB 3.2.2.6**

49. महीनां पयोऽस्योषधीना॑ँ रस इत्याह ।
रूपमेवास्यै–तन्महिमानं ँव्याचष्टे ।
तस्य तेऽक्षीयमाणस्य निर्वपामि देवयज्याया इत्याह ।
आशिषमेवैतामाशास्ते ॥ **TB 3.3.3.5**

50. अग्नेर् जिह्वाऽसि सुभूर् देवाना–मित्याह ।
यथायजु–रेवैतत् ।
धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भवेत्याह ।
आशिषमेवैतामाशास्ते ॥ **TB 3.3 4.3**

51. ताभ्यामेव प्रति प्रोच्यात्याक्रामति ।
विजिहाथां मा मा सन्तप्त–मित्याहाहि॑ँसायै ।
लोकं मे लोककृतौ कृणुत–मित्याह ।
आशिषमेवैतामाशास्ते ॥ **TB 3.3 7.7**

52. इषिता दैव्या होतार इत्याह । इषित॑ँ हि कर्म क्रियते ।
भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहीत्याह ।
आशिषमेवैतामाशास्ते । **TB 3.3.8.11**

53. स्वगा दैव्या होतृभ्य इत्याह ।
यज्ञमेव तथ्स्वगा करोति । स्वस्तिर्–मानुषेभ्य इत्याह ।
आशिषमेवैतामाशास्ते । **TB 3.3.8.11**

54. अधिपति–रस्यधिपतिं मा कुर्वधिपतिरहं
प्रजानां भूयासमित्याह । अधिपतिमेवैनꣳ समानानां करोति ॥
मां धेहि मयि धेहीत्याह । आशिषमेवैतामाशास्ते ॥ **TB 3.9.16.2**

55. नानारूपा भवन्ति ।
तस्मान्नानारूपाः पशवः । बहुरूपा भवन्ति ।
तस्माद्बहुरूपाः पशवः समृद्ध्यै ॥ **TB 3.9.2.4**

56. सप्तदशः प्रजापतिः ।
प्रजापतेराप्त्यै ॥ श्यामा एकरूपा भवन्ति ।
एवमिव हि प्रजापतिः समृद्ध्यै ॥ **TB 1.3.4.3 & 1.3.4.4**

57. शताय स्वाहेत्याह । शतायुर् वै पुरुषः शतवीर्यः ।
आयुरेव वीर्यमवरुन्धे । सहस्राय स्वाहेत्याह ।
आयुर् वै सहस्रं । आयुरेवावरुन्धे ॥

सर्वस्मै स्वाहेत्याह ।
अपरिमितमेवा वरुन्धे ॥ **TB 3.8.15.3**

**58.** श्रेयो वसीय आयथ् संभूतं भूतं ॥
चित्रः केतुः प्रभानाभान्थ् संभान् ।
ज्योतिष्मा–स्तेजस्वानातप–स्तपन्नभितपन् ।
रोचनो रोचमानः शोभनः शोभमानः कल्याणः ॥ **TB 3.10.1.1**

**59.** वरुणस्य विराट् । यज्ञस्य पङ्क्तिः ।
प्रजापतेरनुमतिः । मित्रस्य श्रद्धा ।
सवितुः प्रसूतिः । सूर्यस्य मरीचिः ।
चन्द्रमसो रोहिणी । ऋषीणामरुन्धती । **TA 3.9.2**

**60.** प्रजापति–रकामयत महानन्नादः स्यामिति ।
स एतावश्वमेधे महिमानावपश्यत् । तावगृह्णीत ।
ततो वै स महानन्नादोऽभवत् । यः कामयेत महानन्नादः स्यामिति ।
स एतावश्वमेधे महिमानौ गृह्णीत ।
महानेवान्नादो भवति ॥ यजमानदेवत्या वै वपा ।

राजा महिमा । यद्वपां महिम्नोभयतः परियजति ।
यजमानमेव राज्येनोभयतः परिगृह्णाति ॥
पुरस्ताथ्-स्वाहाकारा वा अन्ये देवाः ।
उपरिष्टाथ्-स्वाहाकारा अन्ये ।
ते वा एतेऽश्व एव मेद्ध्य उभयेऽवरुद्ध्यन्ते ।
यद्वपां महिम्नोभयतः परियजति ।
तानेवोभयान् प्रीणाति ॥ **TB 3.9.10.1**

**61.** वसूनां त्वाऽऽधीतेन । रुद्राणामूर्म्या ।
आदित्यानां तेजसा । विश्वेषां देवानां क्रतुना ।
मरुतामेम्ना जुहोमि स्वाहा ॥ अभिभूति-रहमागमं ।
इन्द्रसखा स्वायुधः । आस्वाशासु दुष्षहः ॥
इदं ँवर्चो अग्निना दत्तमागात् ।
यशो भर्गः सह ओजो बलं च ।
दीर्घायुत्वाय शतशारदाय । **TB 2.5.7.1**

62. साङ्ग्रहण्येष्ट्या यजते ।
इमां जनता॑ँ सङ्गृह्णानीति ॥
द्वादशारत्नी रशना भवति । द्वादश मासाः सँवथ्सरः ।
सँवथ्सरमेवावरुन्धे । मौञ्जी भवति ।
ऊर्ग्वै मुञ्जाः । ऊर्जमेवावरुन्धे ॥
चित्रा नक्षत्रं भवति । चित्रँ वा एतत्कर्म ।
यदश्वमेधः समृद्ध्यै ॥ **TB 3.8.1.1**

63. वरुणो धर्मपतीनां । एतदेव सर्वं भवति ।
सविता त्वा प्रसवाना॑ँ सुवतामिति हस्तं गृह्णाति प्रसूत्यै ।
ये देवा देवसुवः स्थेत्याह । यथायजुरेवै तत् ।
महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्याह ।
आशिषमेवैतामाशास्ते ।
एष वो भरता राजा सोमोऽस्माकं ब्राह्मणाना॑ँ राजेत्याह ।
तस्माथ्–सोमराजानो ब्राह्मणाः ।
प्रति त्यन्नाम राज्यमधायीत्याह ।
राज्यमेवास्मिन् प्रति दधाति । **TB 1.7.4.2**

64. यत् पश्चात्-प्राच्यन्वासीत । अनया समदं दधीत ।
देवानां पत्निया समदं दधीत । देशाद्-दक्षिणत उदीच्यन्वास्ते ।
आत्मनो गोपीथाय ॥ आशासाना सौमनसमित्याह ।
मेद्ध्यामेवैनां केवलीं कृत्वा । आशिषा समर्द्धयति ।
अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृताय कमित्याह ।
एतद्वै पत्नियै व्रतोपनयनं । **TB 3.3.3.2**

65. एतैरायुष्कामः । प्रजापशुकामो वा ॥
पुरस्ताद्दशहोतार-मुदञ्च-मुपदधाति यावत्पदं ।
हृदयं यजुषी पत्न्यौ च । दक्षिणतः प्राञ्चं चतुर्.होतारं ।
पश्चादुदञ्चं पञ्चहोतारं । उत्तरतः प्राञ्च षड्ढोतारं ।
उपरिष्टात् प्राञ्च सप्तहोतारं । हृदयं यजूंषि पत्न्यश्च ।
यथावकाशं ग्रहान् । यथावकाशं प्रतिग्रहान् लोकं पृणाश्च ।
सर्वा हास्यैता देवताः प्रीता अभीष्टा भवन्ति । **TB 3.12.5.4 & 5.5**

==========

## 2 क्रम कदम्बम्

1. कुरुते तस्मात् । तस्मादाहुः । आहुर् यः । यश्च । चैवं । एवं वेँद । वेद यः । यश्च । च न । न कथा । कथा पुत्रस्य । पुत्रस्य केवलं । केवलं कथा । कथा साधारणं । साधारणं पितुः । पितुरिति । इत्यस्कन्नं । अस्कन्नमेव । एव तत् । तद् यत् । यत् प्रयाजेषु । प्रयाजेष्विष्टेषु । प्रयाजेष्विति प्र – याजेषु । इष्टेषु स्कन्दति । स्कन्दति गायत्री । गायत्र्येव । एव तेन । तेन गर्भं । गर्भं धत्ते । धत्ते सा । सा प्रजां । प्रजां पशून् । प्रजामिति प्र – जां । पशून्. यजमानाय । यजमानाय प्र । प्र जनयति । जनयतीति जनयति ॥ **TS 2.6.1.7**

2. अग्ने तेजस्विन्न् । तेजस्विन् तेजस्वी । तेजस्वी त्वं । त्वं देवेषु । देवेषु भूयाः । भूयास्तेजस्वन्तं । तेजस्वन्तं मां । मामायुष्मन्तं । आयुष्मन्तँ वर्चस्वन्तं । वर्चस्वन्तं मनुष्येषु । मनुष्येषु कुरु । कुरु दीक्षायै । दीक्षायै च । च त्वा । त्वा तपसः । तपसश्च । च तेजसे । तेजसे जुहोमि । जुहोमि तेजोवित् । तेजोविदसि । तेजोविदिति तेजः – वित् । असि तेजः । तेजो मा । मा मा । मा हासीत् । हासीन् मा । मा ऽहं । अहं तेजः । तेजो हासिषं । हासिषं मा । मा मां ।

मां तेजः । तेजो हासीत् । हासीदिन्द्र । इन्द्रौजस्विन्न् ।

ओजस्विन्नोजस्वी । ओजस्वी त्वं । त्वं देवेषु । देवेषु भूयाः ।

भूया ओजस्वन्तं । ओजस्वन्तं मां । मामायुष्मन्तं । आयुष्मन्तं

ँवर्चस्वन्तं । वर्चस्वन्तं मनुष्येषु । मनुष्येषु कुरु । कुरु ब्रह्मणः ।

ब्रह्मणश्च । च त्वा । त्वा क्षत्रस्य । क्षत्रस्य च । चौजसे ।

ओजसे जुहोमि । जुहोम्योजोवित् ।

ओजोविदसि । ओजोविदित्योजः – वित् । अस्योजः । ओजो मा ।

मा मा । मा हासीत् । हासीन् मा । मा ऽहं । अहमोजः ।

ओजो हासिषं । हासिषं मा । मा मां । मामोजः । ओजो हासीत् ।

हासीथ् सूर्य । सूर्य भ्राजस्विन्न् । भ्राजस्विन् भ्राजस्वी ।

भ्राजस्वी त्वं । त्वं देवेषु । देवेषु भूयाः । भूया भ्राजस्वन्तं । भ्राजस्वन्तं

मां । मामायुष्मन्तं । आयुष्मन्तं ँवर्चस्वन्तं । वर्चस्वन्तं मनुष्येषु । मनुष्येषु

कुरु । कुरु वायोः । वायोश्च । च त्वा । त्वा ऽपां । अपां च ।

च भ्राजसे । भ्राजसे जुहोमि । जुहोमि सुवर्वित् । सुवर्विदसि ।

सुवर्विदिति सुवः – वित् । असि सुवः । सुवर् मा । मा मा ।

मा हासीत् । हासीन् मा । मा ऽहं । अहꣳ सुवः । सुवर्. हासिषं ।

हासिषं मा । मा मां । मा॒ऽ सुवः । सुवर्. हासीत् । हासीन् मयि । मयि मेधां । मेधां मयि । मयि प्रजां । प्रजां मयि । प्रजामिति प्र–जां । मय्यग्निः । अग्निस्तेजः । तेजो दधातु । दधातु मयि । मयि मेधां । मेधां मयि । मयि प्रजां । प्रजां मयि । प्रजामिति प्र – जां । मयीन्द्रः । इन्द्र इन्द्रियं । इन्द्रियं दधातु । दधातु मयि । मयि मेधां । मेधां मयि । मयि प्रजां । प्रजां मयि । प्रजामिति प्र – जां । मयि सूर्यः । सूर्यो भ्राजः । भ्राजो दधातु । दधात्विति दधातु ॥ **TS 3.3.1.1 & 3.3.1.2**

3. क्षीयेत सारस्वतौ । सारस्वतौ होमौ । होमौ पुरस्तात् । पुरस्ताज् जुहुयात् । जुहुयादमावास्या । अमावास्या वै । अमावास्येत्यमा–वास्या । वै सरस्वती । सरस्वत्यनुलोमं । नुलोममेव । अनुलोममित्यनु – लोमं । एवैनौ । एनावा । आ लभते । लभते ऽमुं । अमुमाप्यायमानं । आप्यायमानमनु । आप्यायमानमित्या – प्यायमानं । अन्वा । आ प्यायते । प्यायत आग्नावैष्णवं । आग्नावैष्णवमेकादशकपालं । आग्नावैष्णवमित्याग्ना – वैष्णवं । एकादशकपालं पुरस्तात् । एकादशकपालमित्येकादश – कपालं । पुरस्तान् निः । निर् वपेत् ।

वपेथ् सरस्वत्यै । सरस्वत्यै चरुं । चरु॒ँ सरस्वते । सरस्वते
द्वादशकपालं । द्वादशकपालं ँयत् । द्वादशकपालमिति द्वादश–कपालं ।
यदाग्नेयः । आग्नेयो भवति । भवत्यग्निः । अग्निर् वै । वै यज्ञमुखं ।
यज्ञमुखं ँयज्ञमुखं । यज्ञमुखमिति यज्ञ – मुखं । यज्ञमुखमेव ।
यज्ञमुखमिति यज्ञ–मुखं । एवर्द्धिं । ऋद्धिं पुरस्तात् । पुरस्ताद् धत्ते ।
धत्ते यत् । यद् वैष्णवः । वैष्णवो भवति । भवति यज्ञः । यज्ञो वै ।
वै विष्णुः । विष्णुर् यज्ञं । यज्ञमेव । एवारभ्य । आरभ्य प्र ।
आरभ्येत्या – रभ्य । प्र तनुते । तनुते सरस्वत्यै । सरस्वत्यै चरुः । चरुर्
भवति । भवति सरस्वते । सरस्वते द्वादशकपालः । द्वादशकपालो
ऽमावास्या । द्वादशकपाल इति द्वादश – कपालः ।
अमावास्या वै । अमावास्येत्यमा – वास्या ।
वै सरस्वती । सरस्वती पूर्णमासः । पूर्णमासः सरस्वान् ।
पूर्णमास इति पूर्ण – मासः । सरस्वान् तौ । तावेव । एव साक्षात् ।
साक्षादा । साक्षादिति स–अक्षात् । आ रभते । रभत ऋध्नोति ।
ऋध्नोत्याभ्यां । आभ्यां द्वादशकपालः । द्वादशकपालः सरस्वते ।
द्वादशकपाल इति द्वादश – कपालः । सरस्वते भवति । भवति

मिथुनत्वाय । मिथुनत्वाय प्रजात्यै । मिथुनत्वायेति मिथुन – त्वाय ।
प्रजात्यै मिथुनौ । प्रजात्या इति प्र – जात्यै । मिथुनौ गावौ । गावौ
दक्षिणा । दक्षिणा समृद्ध्यै । समृद्ध्या इति सं – ऋद्ध्यै ॥ **TS 3.5.1.4**

4. सुहिरण्ये सुशिल्पे । सुहिरण्ये इति सु–हिरण्ये । सुशिल्पे
ऋतस्य । सुशिल्पे इति सु – शिल्पे । ऋतस्य योनौ । योनाविह ।
इह सादयामि । सादयामीति सादयामि ॥ प्रथमा वां । वाꣳ सरथिना ।
सरथिना सुवर्णा । सरथिनेति स – रथिना । सुवर्णा देवौ ।
सुवर्णेति सु – वर्णा । देवौ पश्यन्तौ । पश्यन्तौ भुवनानि ।
भुवनानि विश्वा । विश्वेति विश्वा ॥ अपिप्रयं चोदना । चोदना वां ।
वां मिमाना । मिमाना होतारा । होतारा ज्योतिः । ज्योतिः प्रदिशा । प्रदिशा
दिशन्ता । प्रदिशेति प्र – दिशा । दिशन्तेति दिशन्ता ॥ आदित्यैर् नः ।
नो भारती । भारती वष्टु । वष्टु यज्ञं । यज्ञꣳ सरस्वती ।
सरस्वती सह । सह रुद्रैः । रुद्रैर् नः । न आवीत् । आवीदित्यावीत् ॥
इडोपहूता । उपहूता वसुभिः । उपहूतेत्युप – हूता ।
वसुभिः सजोषाः । वसुभिरिति वसु – भिः ।
सजोषा यज्ञं । सजोषा इति स – जोषाः । यज्ञं नः । नो देवीः ।

देवीरमृतेषु । अमृतेषु धत्त । धत्तेति धत्त ॥ त्वष्टा वीरं । वीरं देवकामं ।
देवकामं जजान । देवकाममिति देव–कामं । जजान त्वष्टुः ।
त्वष्टुरर्वा । अर्वा जायते । जायत आशुः । आशुरश्वः । अश्व इत्यश्वः ॥
त्वष्टेदं । इदं ँविश्वं । विश्वं भुवनं । भुवनं जजान । जजान बहोः ।
बहोः कर्तारं । कर्तारमिह । इह यक्षि । यक्षि होतः । होतरिति होतः ॥
अश्वो घृतेन । घृतेन त्मन्या । त्मन्या समक्तः । समक्त उप । समक्त इति
सं – अक्तः । उप देवान् । देवाꣳ ऋतुशः । ऋतुशः पाथः । ऋतुश
इत्यृतु – शः । पाथ एतु । एत्वित्येतु ॥ वनस्पतिर् देवलोकं ।
देवलोकं प्रजानन्न् । देवलोकमिति देव – लोकं ।
प्रजानन्नग्निना । प्रजानन्निति प्र – जानन्न् । अग्निना हव्या ।
हव्या स्वदितानि । स्वदितानि वक्षत् । वक्षदिति वक्षत् ॥
प्रजापतेस्तपसा । प्रजापतेरिति प्रजा–पतेः । तपसा वावृधानः ।
वावृधानः सद्यः । सद्यो जातः । जातो दधिषे । दधिषे यज्ञं ।
यज्ञमग्ने । अग्न इत्यग्ने ॥ स्वाहाकृतेन हविषा ।
स्वाहाकृतेनेति स्वाहा – कृतेन । हविषा पुरोगाः । पुरोगा याहि ।

पुरोगा इति पुरः – गाः । याहि साद्ध्या । साद्ध्या हविः ।
हविरदन्तु । अदन्तु देवाः । देवा इति देवाः ॥
**(TS 5.1.11.3 & TS 5.1.11.4 )**

**5.** पूर्वपक्षे सुत्या । पूर्वपक्ष इति पूर्व – पक्षे । सुत्या सं ।
सं पद्यते । पद्यते पूर्वपक्षं । पूर्वपक्षं मासाः । पूर्वपक्षमिति पूर्व–पक्षं ।
मासा अभि । अभि सं । सं पद्यन्ते । पद्यन्ते ते । ते पूर्वपक्षे । पूर्वपक्ष
उत् । पूर्वपक्ष इति पूर्व – पक्षे । उत् तिष्ठन्ति । तिष्ठन्ति तान् ।
तानुत्तिष्ठतः । उत्तिष्ठत ओषधयः । उत्तिष्ठत इत्युत् – तिष्ठतः । ओषधयो
वनस्पतयः । वनस्पतयोऽनु । अनूत् । उत् तिष्ठन्ति । तिष्ठन्ति
तान् । तान् कल्याणी । कल्याणी कीर्तिः । कीर्तिरनु । अनूत् ।
उत् तिष्ठति । तिष्ठत्यराथ्सुः । अराथ्सुरिमे । इमे यजमानाः । यजमाना
इति । इति तत् । तदनु । अनु सर्वे । सर्वे राद्ध्नुवन्ति ।
राद्ध्नुवन्तीति राद्ध्नुवन्ति ॥ **TS 7.4.8.3**

**6.** य एवं । एवं ँविद्वान् । विद्वानग्निं । अग्निमुपतिष्ठते । उपतिष्ठते
परि । उपतिष्ठत इत्युप – तिष्ठते । परि त्वा । त्वाऽग्ने । अग्ने पुरं ।

पुरं ँवयं । वयमिति । इत्याह । आह परिधिं । परिधिमेव ।
परिधिमिति परि – धिं । एवैतं । एतं परि । परि दधाति ।
दधात्यस्कन्दाय । अस्कन्दायाग्ने । अग्ने गृहपते । गृहपत इति ।
गृहपत इति गृह – पते । इत्याह । आह यथायजुः । यथायजुरेव ।
यथायजुरिति यथा – यजुः । एवैतत् । एतच्छतं । शत९ हिमाः ।
हिमा इति । इत्याह । आह शतं । शतं त्वा । त्वा हेमन्तान् ।
हेमन्तानिन्धिषीय । इन्धिषीयेति । इति वाव । वावैतत् । एतदाह ।
आह पुत्रस्य । पुत्रस्य नाम । नाम गृह्णाति । गृह्णात्यन्नादं । अन्नादमेव ।
अन्नादमित्यन्न – अदं । एवैनं । एनं करोति । करोति तां । तामाशिषं ।
आशिषमा । आशिषमित्या – शिषं । आ शासे । शासे तन्तवे ।
तन्तवे ज्योतिष्मतीं । ज्योतिष्मतीमिति । इति ब्रूयात् । ब्रूयाद् यस्य ।
यस्य पुत्रः । पुत्रोऽजातः । अजातः स्यात् । स्यात् तेजस्वी ।
तेजस्व्येव । एवास्य । अस्य ब्रह्मवर्चसी । ब्रह्मवर्चसी पुत्रः ।
ब्रह्मवर्चसीति ब्रह्म–वर्चसी । पुत्रो जायते । जायते तां । तामाशिषं ।
आशिषमा । आशिषमित्या – शिषं । आ शासे । शासेऽमुष्मै ।
अमुष्मै ज्योतिष्मतीं । ज्योतिष्मतीमिति । इति ब्रूयात् । ब्रूयाद् यस्य ।

यस्य पुत्रः । पुत्रो जातः । जातः स्यात् । स्यात् तेजः ।
तेज एव । एवास्मिन्न् । अस्मिन् ब्रह्मवर्चसं । ब्रह्मवर्चसं दधाति ।
ब्रह्मवर्चसमिति ब्रह्म – वर्चसं । दधातीति दधाति ॥ **TS 1.5.8.5**

7. अधिश्रयत्याज्यं । अधिश्रयतीत्यधि – श्रयति । आज्यं च ।
च स्तंबयजुः । स्तंबयजुश्च । स्तंबयजुरिति स्तंब – यजुः ।
च हरति । हरत्यभि । अभि च । च गृह्णाति । गृह्णाति वेदिं । वेदिं च ।
च परिगृह्णाति । परिगृह्णाति पत्नीं । परिगृह्णातीति परि – गृह्णाति ।
पत्नीं च । च सं । सं नह्यति । नह्यति प्रोक्षणीः । प्रोक्षणीश्च । प्रोक्षणीरिति
प्र – उक्षणीः । चासादयति । आसादयत्याज्यं ।
आसादयतीत्या – सादयति । आज्यं च । चैतानि । एतानि वै ।
वै द्वादश । द्वादश द्वन्द्वानि । द्वन्द्वानि दर्.शपूर्णमासयोः ।
द्वन्द्वानीति द्वं – द्वानि । दर्.शपूर्णमासयोस्तानि । दर्.शपूर्णमासयोरिति
दर्.श – पूर्णमासयोः । तानि यः । य एवं । एवꣳ संपाद्य ।
संपाद्य यजते । संपाद्येति सं – पाद्य । यजते प्रजातेन । प्रजातेनैव ।
प्रजातेनेति प्र – जातेन । एव यज्ञेन । यज्ञेन यजते । यजते प्र ।
प्र प्रजया । प्रजया पशुभिः । प्रजयेति प्र – जया ।

पशुभिर् मिथुनैः । पशुभिरिति पशु – भिः । मिथुनैर् जायते ।
जायत इति जायते ॥ **TS 1.6.9.4**

**8.** च वाजिनं । वाजिनमिति वाजिनं ॥ सोमꣳ राजानं ।
राजानं ँवरुणं । वरुणमग्निं । अग्निमन्वारभामहे ।
अन्वारभामह इत्यनु – आरभामहे ॥ आदित्यान्. विष्णुं ।
विष्णुꣳ सूर्यं । सूर्यं ब्रह्माणं । ब्रह्माणं च । च बृहस्पतिं । बृहस्पतिमिति
बृहस्पतिं ॥ देवस्य त्वा । त्वा सवितुः । सवितुः प्रसवे । प्रसवेऽश्विनोः ।
प्रसव इति प्र – सवे । अश्विनोर् बाहुभ्यां । बाहुभ्यां पूष्णः ।
बाहुभ्यामिति बाहु – भ्यां । पूष्णो हस्ताभ्यां । हस्ताभ्याꣳ सरस्वत्यै ।
सरस्वत्यै वाचः । वाचो यन्तुः । यन्तुर् यन्त्रेण । यन्त्रेणाग्नेः ।
अग्नेस्त्वा । त्वा साम्राज्येन । साम्राज्येनाभि । साम्राज्येनेति
सां – राज्येन । अभि षिञ्चामि । सिञ्चामीन्द्रस्य ।
इन्द्रस्य बृहस्पतेः । बृहस्पतेस्त्वा । त्वा साम्राज्येन । साम्राज्येनाभि ।
साम्राज्येनेति सां – राज्येन । अभि षिञ्चामि ।
सिञ्चामीति सिञ्चामि ॥ **TS 1.7.10.3**

9. सद्यो दीक्षयन्ति । दीक्षयन्ति सद्यः । सद्यः सोमं ।
सोमं क्रीणन्ति । क्रीणन्ति पुण्डरिस्रजां । पुण्डरिस्रजां प्र ।
प्र यच्छति । यच्छति दशभिः । दशभिर् वथ्सतरैः । दशभिरिति
दश – भिः । वथ्सतरैः सोमं । सोमं क्रीणाति । क्रीणाति
दशपेयः । दशपेयो भवति । दशपेय इति दश–पेयः । भवति शतं ।
शतं ब्राह्मणाः । ब्राह्मणाः पिबन्ति । पिबन्ति सप्तदशं ।
सप्तदश स्तोत्रं । सप्तदशमिति सप्त – दशं । स्तोत्रं भवति । भवति
प्राकाशौ । प्राकाशावद्ध्वर्यवे । अद्ध्वर्यवे ददाति । ददाति स्रजं ।
स्रजमुद्गात्रे । उद्गात्रे रुक्मं । उद्गात्र इत्युत् – गात्रे । रुक्मꣳ होत्रे ।
होत्रेऽश्वं । अश्वं प्रस्तोतृप्रतिहर्तृभ्यां । प्रस्तोतृप्रतिहर्तृभ्यां द्वादश ।
प्रस्तोतृप्रतिहर्तृभ्यामिति प्रस्तोतृप्रतिहर्तृ–भ्यां । द्वादश पष्ठौहीः ।
पष्ठौहीर् ब्रह्मणे । ब्रह्मणे वशां । वशां मैत्रावरुणाय ।
मैत्रावरुणायर्षभं । मैत्रावरुणायेति मैत्रा – वरुणाय ।
ऋषभं ब्राह्मणाच्छꣳसिने । ब्राह्मणाच्छꣳसिने वाससी । वाससी
नेष्टापोतृभ्यां । वाससी इति वाससी । नेष्टापोतृभ्या स्थूरि ।
नेष्टापोतृभ्यामिति नेष्टापोतृ – भ्यां । स्थूरि यवाचितं ।

यवाचितमच्छावाकाय । यवाचितमिति यव – आचितं ।
अच्छावाकायानड्वाहं । अनड्वाहमग्नीधे । अग्नीधे भार्गवः । अग्नीध इत्यग्नि – इधे । भार्गवो होता । होता भवति । भवति श्रायन्तीयं ।
श्रायन्तीयं ब्रह्मसामं । ब्रह्मसामं भवति । ब्रह्मसाममिति ब्रह्म – सामं ।
भवति वारवन्तीयं । वारवन्तीयमग्निष्टोमसामं । वारवन्तीयमिति वार – वन्तीयं । अग्निष्टोमसामꣳ सारस्वतीः ।
अग्निष्टोमसाममित्यग्निष्टोम – सामं । सारस्वतीरपः । अपो गृह्णाति ।
गृह्णातीति गृह्णाति । **TS 1.8.18.1**

**10.** एतया सं(2)ज्ञान्या । सं(2)ज्ञान्या ऽयाजयत् ।
सं(2)ज्ञान्येति सं. – ज्ञान्या । अयाजयदग्नये । अग्नये वसुमते । वसुमते पुरोडाशं । वसुमत इति वसु – मते । पुरोडाशमष्टाकपालं ।
अष्टाकपालं निः । अष्टाकपालमित्यष्टा – कपालं । निरवपत् । अवपथ् सोमाय । सोमाय रुद्रवते । रुद्रवते चरुं । रुद्रवत इति रुद्र – वते ।
चरुमिन्द्राय । इन्द्राय मरुत्वते । मरुत्वते पुरोडाशं ।
पुरोडाशमेकादशकपालं । एकादशकपालꣳ वरुणाय ।
एकादशकपालमित्येकादश – कपालं । वरुणायादित्यवते ।

आदित्यवते चरुं । आदित्यवत इत्यादित्य – वते । चरुं ततः ।
ततो वै । वा इन्द्रं । इन्द्रं देवाः । देवा ज्यैष्ठ्याय । ज्यैष्ठ्यायाभि ।
अभि सं । समजानत । अजानत यः । यः समानैः । समानैर् मिथः ।
मिथो विप्रियः । विप्रियः स्यात् । विप्रिय इति वि – प्रियः ।
स्यात् तं । तमेतया । एतया सं(2)ज्ञान्या । सं(2)ज्ञान्या याजयेत् ।
सं(2)ज्ञान्येति सं – ज्ञान्या । याजयेदग्नये । अग्नये वसुमते । वसुमते
पुरोडाशं । वसुमत इति वसु – मते । पुरोडाशमष्टाकपालं ।
अष्टाकपालं निः । अष्टाकपालमित्यष्टा – कपालं । निर् वपेत् । वपेथ्
सोमाय । सोमाय रुद्रवते । रुद्रवते चरुं । रुद्रवत इति रुद्र – वते ।
चरुमिन्द्राय । इन्द्राय मरुत्वते । मरुत्वते पुरोडाशं ।
पुरोडाशमेकादशकपालं । एकादशकपालं ँवरुणाय ।
एकादशकपालमित्येकादश – कपालं । वरुणायादित्यवते । आदित्यवते
चरुं । आदित्यवत इत्यादित्य – वते । चरुमिन्द्रं । इन्द्रमेव । एवैनं ।
एनं भूतं । भूतं ज्यैष्ठ्याय । ज्यैष्ठ्याय समानाः । समाना अभि ।
अभि सं । सं जानते । जानते वसिष्ठः । वसिष्ठः समानानां ।
समानानां भवति । भवतीति भवति ॥ **TS 2.2.11.6**

11. एवास्मै । अस्मै पर्जन्यं । पर्जन्यं ँवर्.षयन्ति । वर्.षयन्त्युत ।
उतावर्.षिष्यन्न् । अवर्.षिष्यन् वर्.षति । वर्.षत्येव । एव सृज ।
सृजा वृष्टिं । वृष्टिं दिवः । दिव आ । आऽद्भिः । अद्भिः समुद्रं ।
अद्भिरित्यत् – भिः । समुद्रं पृण । पृणेति । इत्याह । आहेमाः ।
इमाश्च । चैव । एवामूः । अमूश्च । चापः । अपः सं । समर्द्धयति ।
अर्द्धयत्यथो । अथो आभिः । अथो इत्यथो । आभि रेव । एवामूः ।
अमूरच्छ । अच्छैति । एत्यब्जाः । अब्जा असि ।
अब्जा इत्यप् – जाः । असि प्रथमजाः । प्रथमजा बलं । प्रथमजा इति
प्रथम – जाः । बलमसि । असि समुद्रियं । समुद्रियमिति । इत्याह ।
आह यथायजुः । यथायजुरेव । यथायजुरिति यथा – यजुः । एवैतत् ।
एतदुत् । उन्नंभय । नंभय पृथिवीं । पृथिवीमिति । इति वर्.षाह्वां ।
वर्.षाह्वां जुहोति । वर्.षाह्वामिति वर्.ष–ह्वां । जुहोत्येषा । एषा वै ।
वा ओषधीनां । ओषधीनां ँवृष्टिवनिः । वृष्टिवनिस्तया ।
वृष्टिवनिरिति वृष्टि – वनिः । तयैव । एव वृष्टिं । वृष्टिमा ।
आ च्यावयति । च्यावयति ये । ये देवाः । देवा दिविभागाः ।
दिविभागा इति । दिविभागा इति दिवि – भागाः । इति कृष्णाजिनं ।

कृष्णाजिनमव । कृष्णाजिनमिति कृष्ण – अजिनं । अव धूनोति ।
धूनोतीमे । इम एव । एवास्मै । अस्मै लोकाः । लोकाः प्रीताः ।
प्रीता अभीष्टाः । अभीष्टा भवन्ति । अभीष्टा इत्यभि – इष्टाः ।
भवन्तीति भवन्ति ॥ **TS 2.4.10.3**

12. यत ईश्वरः । ईश्वरो वै । वा अश्वः । अश्वोऽयतः ।
अयतोऽप्रतिष्ठितः । अप्रतिष्ठितः परां । अप्रतिष्ठित इत्यप्रति – स्थितः ।
परां परावतं । परावतं गन्तोः । परावतमिति परा–वतं । गन्तोर् यत् ।
यत् पार्थुरश्मं । पार्थुरश्मं ब्रह्मसामं । पार्थुरश्ममिति पार्थु–रश्मं ।
ब्रह्मसामं भवति । ब्रह्मसाममिति ब्रह्म – सामं । भवत्यश्वस्य ।
अश्वस्य यत्यै । यत्यै धृत्यै । धृत्यै सङ्कृति । सङ्कृत्यच्छावाकसामं ।
सङ्कृतीति सं – कृति । अच्छावाकसामं भवति ।
अच्छावाकसाममित्यच्छावाक – सामं ।
भवत्युथ्सन्नयज्ञः । उथ्सन्नयज्ञो वै । उथ्सन्नयज्ञ इत्युथ्सन्न – यज्ञः ।
वा एषः । एष यत् । यदश्वमेधः । अश्वमेधः कः ।
अश्वमेध इत्यश्व – मेधः । कस्तत् । तद् वेद । वेदेति ।
इत्याहुः । आहुर् यदि । यदि सर्वः । सर्वो वा । वा क्रियते ।

क्रियते न । न वा । वा सर्वः । सर्व इति । इति यत् । यथ् सङ्कृति ।
सङ्कृत्यच्छावाकसामं । सङ्कृतीति सं – कृति ।
अच्छावाकसामं भवति । अच्छावाकसाममित्यच्छावाक – सामं ।
भवत्यश्वस्य । अश्वस्य सर्वत्वाय । सर्वत्वाय पर्याप्त्यै ।
सर्वत्वायेति सर्व – त्वाय । पर्याप्त्या अनन्तरायाय । पर्याप्त्या इति
परि – आप्त्यै । अनन्तरायाय सर्वस्तोमः ।
अनन्तरायायेत्यनन्तः – आयाय । सर्वस्तोमोऽतिरात्रः । सर्वस्तोम इति
सर्व – स्तोमः । अतिरात्र उत्तमं । अतिरात्र इत्यति – रात्रः ।
उत्तममहः । उत्तममित्युत् – तमं । अहर् भवति । भवति सर्वस्य ।
सर्वस्याप्त्यै । आप्त्यै सर्वस्य । सर्वस्य जित्यै । जित्यै सर्वं ।
सर्वमेव । एव तेन । तेनाऽऽप्नोति । आप्नोति सर्वं । सर्वं जयति ।
जयतीति जयति ॥ **TS 5.4.12.3**

**13.** आयुर् दधाति । दधाति पुरस्तात् । पुरस्तादुक्थस्य ।
उक्थस्यावनीयः । अवनीय इति । अवनीय इत्यव – नीयः ।
इत्याहुः । आहुः पुरस्तात् । पुरस्ताद्धि । ह्यायुषः । आयुषो
भुङ्क्ते । भुङ्क्ते मद्ध्यतः । मद्ध्यतोऽवनीयः । अवनीय इति ।

अवनीय इत्यव – नीयः । इत्याहुः । आहुर् मद्ध्यमेन ।
मद्ध्यमेन हि । ह्यायुषः । आयुषो भुङ्क्ते । भुङ्क्त उत्तरार्द्धे ।
उत्तरार्द्धेऽवनीयः । उत्तरार्द्ध इत्युत्तर – अर्द्धे । अवनीय इति ।
अवनीय इत्यव – नीयः । इत्याहुः । आहुरुत्तमेन । उत्तमेन हि ।
उत्तमेनेत्युत् – तमेन । ह्यायुषः । आयुषो भुङ्क्ते । भुङ्क्ते वैश्वदेव्यां ।
वैश्वदेव्यामृचि । वैश्वदेव्यामिति वैश्व – देव्यां ।
ऋचि शस्यमानायां । शस्यमानायामव । अव नयति ।
नयति वैश्वदेव्यः । वैश्वदेव्यो वै । वैश्वदेव्य इति वैश्व – देव्यः ।
वै प्रजाः । प्रजाः प्रजासु । प्रजा इति प्र – जाः । प्रजास्वेव ।
प्रजास्विति प्र – जासु । एवायुः । आयुर् दधाति ।
दधातीति दधाति ॥ **TS 6.5.2.3**

**14.** तत् पथा । पथा यन्ति । यन्ति समानं । समानꣳ साम ।
साम भवति । भवति देवलोकः । देवलोको वै । देवलोक
इति देव – लोकः । वै साम । साम देवलोकात् । देवलोकादेव ।
देवलोकादिति देव – लोकात् । एव न । न यन्ति । यन्त्यन्याअन्याः ।
अन्याअन्या ऋचः । अन्याअन्या इत्यन्याः – अन्याः । ऋचो भवन्ति ।

भवन्ति मनुष्यलोकः । मनुष्यलोको वै । मनुष्यलोक इति
मनुष्य – लोकः । वा ऋचः । ऋचो मनुष्यलोकात् । मनुष्यलोकादेव ।
मनुष्यलोकादिति मनुष्य–लोकात् । एवान्यमन्यं । अन्यमन्यं देवलोकं ।
अन्यमन्यमित्यन्यं – अन्यं । देवलोकमभ्यारोहन्तः । देवलोकमिति
देव – लोकं । अभ्यारोहन्तो यन्ति । अभ्यारोहन्त इत्यभि–आरोहन्तः ।
यन्त्यभिवर्तः । अभिवर्तो ब्रह्मसामं । अभिवर्त इत्यभि – वर्तः ।
ब्रह्मसामं भवति । ब्रह्मसाममिति ब्रह्म – सामं । भवति सुवर्गस्य ।
सुवर्गस्य लोकस्य । सुवर्गस्येति सुवः – गस्य । लोकस्याभिवृत्यै ।
अभिवृत्या अभिजित् । अभिवृत्या इत्यभि – वृत्यै ।
अभिजिद् भवति । अभिजिदित्यभि–जित् । भवति
सुवर्गस्य । सुवर्गस्य लोकस्य । सुवर्गस्येति सुवः – गस्य ।
लोकस्याभिजित्यै । अभिजित्यै विश्वजित् ।
अभिजित्या इत्यभि–जित्यै । विश्वजिद् भवति । विश्वजिदिति
विश्व – जित् । भवति विश्वस्य । विश्वस्य जित्यै । जित्यै मासिमासि ।
मासिमासि पृष्ठानि । मासिमासीति मासि – मासि । पृष्ठान्युप ।
उप यन्ति । यन्ति मासिमासि । मासिमास्यतिग्राह्याः ।

मासिमासीति मासि – मासि । अतिग्राह्या गृह्यन्ते । अतिग्राह्या इत्यति – ग्राह्याः । गृह्यन्ते मासिमासि । मासिमास्येव । मासिमासीति मासि – मासि । एव वीर्यं । वीर्यं दधति । दधति मासां । मासां प्रतिष्ठित्यै । प्रतिष्ठित्या उपरिष्टात् । प्रतिष्ठित्या इति प्रति – स्थित्यै । उपरिष्टान् मासां । मासां पृष्ठानि । पृष्ठान्युप । उप यन्ति । यन्ति तस्मात् । तस्मादुपरिष्टात् । उपरिष्टादोषधयः । ओषधयः फलं । फलं गृह्णन्ति । गृह्णन्तीति गृह्णन्ति ॥ **TS 7.5.1.6**

15. समुद्र उदरं । उदरमन्तरिक्षं । अन्तरिक्षं पायुः । पायुर् द्यावापृथिवी । द्यावापृथिवी आण्डौ । द्यावापृथिवी इति द्यावा – पृथिवी । आण्डौ ग्रावा । ग्रावा शेपः । शेपः सोमः । सोमो रेतः । रेतो यत् । यज् जञ्जभ्यते । जञ्जभ्यते तत् । तद् वि । वि द्योतते । द्योतते यत् । यद् विधूनुते । विधूनुते तत् । विधूनुत इति वि – धूनुते । तद् स्तनयति । स्तनयति यत् । यन् मेहति । मेहति तत् । तद् वर्.षति । वर्.षति वाक् । वागेव । एवास्य । अस्य वाक् । वागहः । अहर् वै । वा अश्वस्य । अश्वस्य जायमानस्य । जायमानस्य महिमा । महिमा पुरस्तात् । पुरस्ताज् जायते । जायते रात्रिः ।

रात्रिरेनं । एनं महिमा । महिमा पश्चात् । पश्चादनु । अनु जायते ।
जायत एतौ । एतौ वै । वै महिमानौ । महिमानावश्वं । अश्वमभितः ।
अभितः सं । सं बभूवतुः । बभूवतुर्. हयः । हयो देवान् ।
देवानवहत् । अवहदर्वा । अर्वाऽसुरान् । असुरान्. वाजी ।
वाजी गन्धर्वान् । गन्धर्वानश्वः । अश्वो मनुष्यान् । मनुष्यान्थ् समुद्रः ।
समुद्रो वै । वा अश्वस्य । अश्वस्य योनिः । योनिः समुद्रः ।
समुद्रो बन्धुः । बन्धुरिति बन्धुः ॥ **TS 7.5.25.2**

**=========**

# 3 जटा कदम्बम्

**(Note: The Padam is given only for reference. Not to chant "padam " while chanting JATA. The Padam is not given in original book and we have added it for the benefit for users.)**

## jata 1

**1.3.3.1(48)–** बुद्ध्नियः । रौद्रेण ।

बुद्ध्नियो रौद्रेण रौद्रेण बुद्ध्नियो बुद्ध्नियो रौद्रेण ।

**1.3.3.1(49)–** रौद्रेण । अनीकेन ।

रौद्रे णानीकेना नीकेन रौद्रेण रौद्रेणानीकेन ।

**1.3.3.1(50)–** अनीकेन । पाहि ।

अनीकेन पाहि पाह्य नीकेना नीकेन पाहि ।

**1.3.3.1(51)–** पाहि । मा ।

पाहि मा मा पाहि पाहि मा ।

**1.3.3.1(52)–** मा । अग्ने ।

मा ऽग्ने ऽग्ने मा मा ऽग्ने ।

**1.3.3.1(53)–** अग्ने । पिपृहि ।

अग्ने पिपृहि पिपृह्यग्ने ऽग्ने पिपृहि ।

**1.3.3.1(54)**– पिपृहि । मा ।

पिपृहि मा मा पिपृहि पिपृहि मा ।

**1.3.3.1(55)**– मा । मा ।

मा मा मा मा मा मा ।

**1.3.3.1(56)**– मा । मा ।

मा मा मा मा मा मा ।

**1.3.3.1(57)**– मा । हि॒ꣳसीः ॥

मा हिꣳसीर्. हिꣳसीर् मा मा हिꣳसीः ।

**1.3.3.1(58)**– हिꣳसीः ॥

हिꣳसीरिति हिꣳसीः ।

## jata 2

**4.2.6.5(57)**– ओषधयः । सं ।

ओषधयः सꣳ स मोषधय ओषधयः सं ।

**4.2.6.5(58)**– सं । वदन्ते ।

सं ँवदन्ते वदन्ते सꣳ सं ँवदन्ते ।

**4.2.6.5(59)**– वदन्ते । सोमेन ।

वदन्ते सोमेन सोमेन वदन्ते वदन्ते सोमेन ।

**4.2.6.5(60)**– सोमेन । सह ।

सोमेन सह सह सोमेन सोमेन सह ।

**4.2.6.5(61)**– सह । राज्ञा ॥

सह राज्ञा राज्ञा सह सह राज्ञा ।

**4.2.6.5(62)**– राज्ञा ॥

राज्ञेति राज्ञा ।

**4.2.6.5(63)**– यस्मै । करोति ।

यस्मै करोति करोति यस्मै यस्मै करोति ।

**4.2.6.5(64)**– करोति । ब्राह्मणः ।

करोति ब्राह्मणो ब्राह्मणः करोति करोति ब्राह्मणः ।

**4.2.6.5(65)**– ब्राह्मणः । तं ।

ब्राह्मण स्तं तं ब्राह्मणो ब्राह्मण स्तं ।

**4.2.6.5(66)**– तं । राजन्न् ।

त৺ राजन् राजन् तं त৺ राजन्न् ।

**4.2.6.5(67)–** राजन्न् । पारयामसि ॥

राजन् पारयामसि पारयामसि राजन् राजन् पारयामसि ।

**4.2.6.5(68)–** पारयामसि ॥

पारयामसीति पारयामसि ।

## jata 3

**2.6.1.7(1)–** कुरुते । तस्मात् ।

कुरुते तस्मात् तस्मात् कुरुते कुरुते तस्मात् ।

**2.6.1.7(2)–** तस्मात् । आहुः ।

तस्मा दाहु राहु स्तस्मात् तस्मा दाहुः ।

**2.6.1.7(3)–** आहुः । यः ।

आहुर् यो य आहु राहुर् यः ।

**2.6.1.7(4)–** यः । च ।

यश्च च यो यश्च ।

**2.6.1.7(5)–** च । एवं ।

चैव मेवं च चैवं ।

**2.6.1.7(6)–** ए॒वं । वेद॑ ।

ए॒वं ँवे॒द वे॒दैव मे॒वं ँवेद॑ ।

**2.6.1.7(7)–** वेद॑ । यः ।

वे॒द यो यो वे॒द वे॒द यः ।

**2.6.1.7(8)–** यः । च॒ ।

यश्च॑ च॒ यो यश्च॑ ।

**2.6.1.7(9)–** च॒ । न ।

च॒ न न च॑ च॒ न ।

**2.6.1.7(10)–** न । क॒था ।

न क॒था क॒था न न क॒था ।

**2.6.1.7(11)–** क॒था । पु॒त्रस्य॑ ।

क॒था पु॒त्रस्य॑ पु॒त्रस्य॑ क॒था क॒था पु॒त्रस्य॑ ।

**2.6.1.7(12)–** पु॒त्रस्य॑ । केव॑लं ।

पु॒त्रस्य॒ केव॑ल॒ं केव॑लं पु॒त्रस्य॑ पु॒त्रस्य॒ केव॑लं ।

**2.6.1.7(13)–** केव॑लं । क॒था ।

केव॑लं क॒था क॒था केव॑ल॒ं केव॑लं क॒था ।

**2.6.1.7(14)–** कथा । साधारणं ।

कथा साधारणꣳ साधारणं कथा कथा साधारणं ।

**2.6.1.7(15)–** साधारणं । पितुः ।

साधारणं पितुः पितुः साधारणꣳ साधारणं पितुः ।

**2.6.1.7(16)–** पितुः । इति ।

पितु रितीति पितुः पितु रिति ।

**2.6.1.7(17)–** इति । अस्कन्नं ।

इत्यस्कन्न मस्कन्न मिती त्यस्कन्नं ।

**2.6.1.7(18)–** अस्कन्नं । एव ।

अस्कन्न मेवैवा स्कन्न मस्कन्न मेव ।

**2.6.1.7(19)–** एव । तत् ।

एव तत् तदेवैव तत् ।

**2.6.1.7(20)–** तत । यत् ।

तद् यद् यत् तत् तद् यत् ।

**2.6.1.7(21)–** यत् । प्रयाजेषु ।

यत् प्रयाजेषु प्रयाजेषु यद् यत् प्रयाजेषु ।

**2.6.1.7(22)–** प्रयाजेषु । इष्टेषु ।

प्रयाजे ष्विष्टे ष्विष्टेषु प्रयाजेषु

प्रयाजे ष्विष्टेषु ।

**2.6.1.7(22)–** प्रयाजेषु ।

प्रयाजेष्विति प्र – याजेषु ।

**2.6.1.7(23)–** इष्टेषु । स्कन्दति ।

इष्टेषु स्कन्दति स्कन्द तीष्टे ष्विष्टेषु स्कन्दति ।

**2.6.1.7(24)–** स्कन्दति । गायत्री ।

स्कन्दति गायत्री गायत्री स्कन्दति स्कन्दति गायत्री ।

**2.6.1.7(25)–** गायत्री । एव ।

गायत्र्येवैव गायत्री गायत्र्येव ।

**2.6.1.7(26)–** एव । तेन ।

एव तेन तेनैवैव तेन ।

**2.6.1.7(27)–** तेन । गर्भं ।

तेन गर्भं गर्भं तेन तेन गर्भं ।

2.6.1.7(28)- गर्भं । धत्ते ।

गर्भं धत्ते धत्ते गर्भं गर्भं धत्ते ।

2.6.1.7(29)- धत्ते । सा ।

धत्ते सा सा धत्ते धत्ते सा ।

2.6.1.7(30)- सा । प्रजां ।

सा प्रजां प्रजाᳪं सा सा प्रजां ।

2.6.1.7(31)- प्रजां । पशून् ।

प्रजां पशून् पशून् प्रजां प्रजां पशून् ।

2.6.1.7(31)- प्रजां ।

प्रजामिति प्र - जां ।

2.6.1.7(32)- पशून् । यजमानाय ।

पशून्. यजमानाय यजमानाय पशून् पशून्. यजमानाय ।

2.6.1.7(33)- यजमानाय । प्र ।

यजमानाय प्र प्र यजमानाय यजमानाय प्र ।

2.6.1.7(34)- प्र । जनयति ॥

प्र जनयति जनयति प्र प्र जनयति ।

**2.6.1.7(35)-** जनयति ॥

जनयतीति जनयति ।

## jata 4

**2.5.4.5(1)-** एव । एनं ।

एवैन मेन मेवैवैनं ।

**2.5.4.5(2)-** एनं । देवता ।

एनं देवता देवतैन मेनं देवता ।

**2.5.4.5(3)-** देवता । इज्यमाना ।

देव तेज्यमा नेज्यमाना देवता देव तेज्यमाना ।

**2.5.4.5(4)-** इज्यमाना । भूत्यै ।

इज्यमाना भूत्यै भूत्या इज्यमा नेज्यमाना भूत्यै ।

**2.5.4.5(5)-** भूत्यै । इन्धे ।

भूत्या इन्ध इन्धे भूत्यै भूत्या इन्धे ।

**2.5.4.5(6)-** इन्धे । वसीयान् ।

इन्धे वसीयान्. वसीया निन्ध इन्धे वसीयान् ।

**2.5.4.5(7)–** वसीयान् । भवति ।

वसीयान् भवति भवति वसीयान्. वसीयान् भवति ।

**2.5.4.5(8)–** भवति । सँवथ्सरस्य ।

भवति सँवथ्सरस्य सँवथ्सरस्य भवति भवति सँवथ्सरस्य ।

**2.5.4.5(9)–** सँवथ्सरस्य । परस्तात् ।

सँवथ्सरस्य परस्तात् परस्ताथ् सँवथ्सरस्य सँवथ्सरस्य परस्तात् ।

**2.5.4.5(9)–** सँवथ्सरस्य ।

सँवथ्सरस्येति सं – वथ्सरस्य ।

**2.5.4.5(10)–** परस्तात् । अग्नये ।

परस्तादग्नये ऽग्नये परस्तात् परस्ता दग्नये ।

**2.5.4.5(11)–** अग्नये । व्रतपतये ।

अग्नये व्रतपतये व्रतपतये ऽग्नये ऽग्नये व्रतपतये ।

**2.5.4.5(12)–** व्रतपतये । पुरोडाशं ।

व्रतपतये पुरोडाशं पुरोडाशं ँव्रतपतये व्रतपतये पुरोडाशं ।

**2.5.4.5(12)–** व्रतपतये ।

व्रतपतय इति व्रत – पतये ।

**2.5.4.5(13)**– पुरोडाशं । अष्टाकपालं ।

पुरोडाश मष्टाकपाल मष्टाकपालं पुरोडाशं पुरोडाश मष्टाकपालं ।

**2.5.4.5(14)**– अष्टाकपालं । निः ।

अष्टाकपालं निर् णिरष्टाकपाल मष्टाकपालं निः ।

**2.5.4.5(14)**– अष्टाकपालं ।

अष्टाकपालमित्यष्टा – कपालं ।

**2.5.4.5(15)**– निः । वपेत् ।

निर् वपेद् वपेन् निर् णिर् वपेत् ।

**2.5.4.5(16)**– वपेत् । सँवथ्सरं ।

वपेथ् सँवथ्सरꣳ सँवथ्सरं ँवपेद् वपेथ् सँवथ्सरं ।

**2.5.4.5(17)**– सँवथ्सरं । एव ।

सँवथ्सर मेवैव सँवथ्सरꣳ सँवथ्सर मेव ।

**2.5.4.5(17)**– सँवथ्सरं ।

सँवथ्सरमिति सं – वथ्सरं ।

**2.5.4.5(18)**– एव । एनं ।

एवैन मेन मेवैवैनं ।

**2.5.4.5(19)–** एनं । वृत्रं ।

एनं ँवृत्रं ँवृत्र मेन मेनं ँवृत्रं ।

**2.5.4.5(20)–** वृत्रं । जघ्निवाꣳसं ।

वृत्रं जघ्निवाꣳसं जघ्निवाꣳसं ँवृत्रं ँवृत्रं जघ्निवाꣳसं ।

**2.5.4.5(21)–** जघ्निवाꣳसं । अग्निः ।

जघ्निवाꣳस मग्नि रग्निर् जघ्निवाꣳसं जघ्निवाꣳस मग्निः ।

**2.5.4.5(22)–** अग्निः । व्रतपतिः ।

अग्निर् व्रतपतिर् व्रतपति रग्नि रग्निर् व्रतपतिः ।

**2.5.4.5(23)–** व्रतपतिः । व्रतं ।

व्रतपतिर् व्रतं ँव्रतं ँव्रतपतिर् व्रतपतिर् व्रतं ।

**2.5.4.5(23)–** व्रतपतिः ।

व्रतपतिरिति व्रत – पतिः ।

**2.5.4.5(24)–** व्रतं । आ ।

व्रत मा व्रतं ँव्रत मा ।

**2.5.4.5(25)–** आ । लंभयति ।

आ लंभयति लंभयत्या लंभयति ।

**2.5.4.5(26)–** लंभयति । ततः ।

लंभयति तत स्ततो लंभयति लंभयति ततः ।

**2.5.4.5(27)–** ततः । अधि ।

ततो ऽध्यधि तत स्ततो ऽधि ।

**2.5.4.5(28)–** अधि । कामं ।

अधि कामं काम मध्यधि कामं ।

**2.5.4.5(29)–** कामं । यजेत ॥

कामं ँयजेत यजेत कामं कामं ँयजेत ।

**2.5.4.5(30)–** यजेत ॥

यजेतेति यजेत ।

## jata 5

**7.5.3.2(24)–** सर्वेभ्यः । वै ।

सर्वेभ्यो वै वै सर्वेभ्यः सर्वेभ्यो वै ।

**7.5.3.2(25)–** वै । कामेभ्यः ।

वै कामेभ्यः कामेभ्यो वै वै कामेभ्यः ।

7.5.3.2(26)– कामेभ्यः । सन्धिः ।

कामेभ्यः सन्धिः सन्धिः कामेभ्यः कामेभ्यः सन्धिः ।

7.5.3.2(27)– सन्धिः । दुहे ।

सन्धिर् दुहे दुहे सन्धिः सन्धिर् दुहे ।

7.5.3.2(27)– सन्धिः ।

सन्धिरिति सं – धिः ।

7.5.3.2(28)– दुहे । तत् ।

दुहे तत् तद् दुहे दुहे तत् ।

7.5.3.2(29)– तत् । यजमानाः ।

तद् यजमाना यजमाना स्तत् तद् यजमानाः ।

7.5.3.2(30)– यजमानाः । सर्वान् ।

यजमानाः सर्वान् थ्सर्वान्. यजमाना यजमानाः सर्वान् ।

7.5.3.2(31)– सर्वान् । कामान् ।

सर्वान् कामान् कामान् थ्सर्वान् थ्सर्वान् कामान् ।

7.5.3.2(32)– कामान् । अव ।

कामा नवाव कामान् कामा नव ।

**7.5.3.2(33)**– अव । रुन्धते ॥

अव रुन्धते रुन्धते ऽवाव रुन्धते ।

**7.5.3.2(34)**– रुन्धते ॥

रुन्धत इति रुन्धते ।

==========

## 4 घन कदम्बम्

**(Note: The Padam is given only for reference. Not to chant "padam " while chanting Ghanam.. The Padam is not given in original book and we have added it for the benefit for users.)**

## Ghanam 1

**6.1.1.9(37)**– यस्मै । कं । पुने ।

यस्मै कं कं ँयस्मै यस्मै कं पुने पुने कं ँयस्मै यस्मै कं पुने ।

**6.1.1.9(38)**– कं । पुने । तत् ।

कं पुने पुने कं कं पुने तत् तत् पुने कं कं पुने तत् ।

**6.1.1.9(39)**– पुने । तत् । शकेयं ।

पुने तत् तत् पुने पुने तच्छकेयꣳ शकेयं तत्
पुने पुने तच्छकेयं ।

**6.1.1.9(40)**– तत् । शकेयं । इति ।

तच्छकेयꣳ शकेयं तत् तच्छकेय मितीति शकेयं तत् तच्छकेय मिति ।

**6.1.1.9(41)**– शकेयं । इति । आह ।

शकेय मितीति शकेयꣳ शकेय मित्या हाहेति शकेयꣳ शकेय
मित्याह ।

**6.1.1.9(42)**– इति । आह । आशिषं ।

इत्याहाहे तीत्या हाशिष माशिष माहे तीत्या हाशिषं ।

**6.1.1.9(43)**– आह । आशिषं । एव ।

आहाशिष माशिष माहा हाशिष मेवै वाशिष माहा हाशिष मेव ।

**6.1.1.9(44)**– आशिषं । एव । एतां ।

आशिष मेवै वाशिष माशिष मेवैता मेता मेवा शिष माशिष मेवैतां ।

**6.1.1.9(44)**– आशिषं ।

आशिषमित्या – शिषं ।

**6.1.1.9(45)**– एव । एतां । आ ।

एवैता मेता मेवै वैता मैता मेवै वैता मा ।

**6.1.1.9(46)**– एतां । आ । शास्ते ॥

एता मैता मेता मा शास्ते शास्त ऐता मेता मा शास्ते ।

**6.1.1.9(47)**– आ । शास्ते ॥

आ शास्ते शास्त आ शास्ते ।

**6.1.1.9(48)**– शास्ते ॥

शास्त इति शास्ते ।

## Ghanam 2

**4.7.15.7(29)**– प्र । अतारि । अग्ने ।

प्रातार् यतारि प्र प्रातार् यग्ने अग्ने अतारि प्र प्रातार् यग्ने ।

**4.7.15.7(30)**– अतारि । अग्ने । प्रतरां ।

अतार् यग्ने अग्ने अतार् यतार् यग्ने प्रतरां प्रतरा मग्ने अतार् यतार् यग्ने प्रतरां ।

**4.7.15.7(31)**– अग्ने । प्रतरां । नः ।

अग्ने प्रतरां प्रतरा मग्ने अग्ने प्रतरां नो नः प्रतरा मग्ने अग्ने प्रतरां नः ।

**4.7.15.7(32)**– प्रतरां । नः । आयुः ॥

प्रतरां नो नः प्रतरां प्रतरां न आयु रायुर् नः प्रतरां प्रतरां न आयुः ।

**4.7.15.7(32)**– प्रतरां ।

प्रतरामिति प्र – तरां ।

**4.7.15.7(33)**– नः । आयुः ॥

न आयु रायुर् नो न आयुः ।

**4.7.15.7(34)**– आयुः ॥

आ॒युरित्यायुः ।

## कल्याणपञ्चाशत् कदंबकं समाप्तं

======= शुभं =======